National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 288-292
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Santu Kumar Pan,**
Assistant Professor of Sanskrit,
Bijoy Krishna Girls' College,
Howrah, West Bengal

**Correspondence:**
**Dr. Santu Kumar Pan,**
Assistant Professor of Sanskrit,
Bijoy Krishna Girls' College,
Howrah, West Bengal

# उपनिषत्सु मुख्यब्रह्मोपसनाविचारविमर्शः

**Dr. Santu Kumar Pan**

**प्रबन्धसारः-**

उपनिषदः भारतीयदर्शनस्य मूलभूतग्रन्थाः सन्ति, येषु मोक्षविद्यायाः उपासनानां च विस्तृतवर्णनं मिलति। उपनिषत्सु मोक्षः मानवजीवनस्य परमलक्ष्यं मन्यते, तथा च तस्य प्राप्त्यर्थं विभिन्नाः उपासनाः प्रतिपादिताः सन्ति। उपनिषत्सु मोक्षविद्या आत्मज्ञानस्य रूपेण वर्णिता अस्ति। आत्मा ब्रह्मणः सह अभिन्नः अस्ति, तथा च तस्य ज्ञानं मोक्षस्य साधनम्। "तत्त्वमसि" (त्वं तत् असि) इति महावाक्यं आत्मनः ब्रह्मणः सह अभेदं प्रतिपादयति। उपनिषत्सु विभिन्नाः उपासनाः वर्णिताः सन्ति, याः मोक्षप्राप्त्यर्थं सहायकाः भवन्ति।

1. ओम्कारोपासना: ओम्कारः ब्रह्मणः प्रतीकः अस्ति, तथा च तस्य उपासना मोक्षप्राप्त्यर्थं महत्त्वपूर्णा मन्यते।
2. प्राणोपासना: प्राणः जीवनस्य आधारः अस्ति, तथा च तस्य उपासना आत्मज्ञानस्य साधनम्।
3. आत्मोपासना: आत्मनः उपासना मोक्षप्राप्त्यर्थं प्रत्यक्षसाधनम्।

**उपनिषत्सु प्रमुखउपासनाः-**

1. शाण्डिल्यविद्या: शाण्डिल्यविद्यायां आत्मनः ब्रह्मणः सह अभेदं प्रतिपादितमस्ति।
2. नचिकेतउपाख्यानम्: नचिकेतउपाख्याने मोक्षविद्यायाः स्वरूपं वर्णितमस्ति।
3. भृगुवारुणीविद्या: भृगुवारुणीविद्यायां आत्मज्ञानस्य प्रक्रिया वर्णिता अस्ति।

उपनिषत्सु मोक्षविद्या उपासनाः च मानवजीवनस्य परमलक्ष्यं प्रतिपादयन्ति। आत्मज्ञानं मोक्षस्य साधनम्, तथा च विभिन्नाः उपासनाः तस्य प्राप्त्यर्थं सहायकाः भवन्ति। उपनिषत्सु प्रतिपादिताः उपासनाः मानवजीवनस्य आध्यात्मिकविकासाय महत्त्वपूर्णाः सन्ति।

**कुञ्चिकशब्दाः**- (सद्विद्या, आनन्दविद्या, प्रस्तावणविद्या, प्रतर्दनविद्या, शाण्डिल्यविद्या, मधुविद्या, भूमविद्या, अक्षरविद्या,)

**उपनिषद् शब्दार्थः –**

उप-नि-उपसर्गपूर्वकात् सद् धातोः क्विप् प्रत्ययः उपनिषत् शब्दो निष्पद्यते। उप-समीपे, नि-निश्चयेन सद् स्थानम् इति तत्त्वज्ञानार्थं गुरोः समीपे सविनयं स्थितिः उपनिषद् इति उच्यते। तत्त्वज्ञान-प्रतिपादनाद् ग्रन्थाः अपि उपनिषद् इति उच्यते। उपनिषद्-शब्दार्थो ब्रह्मविद्या इत्यऽपि गृह्यते। सद् धातोः अर्थत्रयम् आश्रित्य उपनिषद् शब्दार्थो निरूप्यते यद् या संसारबीजभूताम् अविद्यां नाशयति, यया ब्रह्मप्राप्तिः भवति, यया च मानवदुःखनाशको भवति सा उपनिषद् इति। अतः श्रीशङ्कराचार्यः अविद्यानाशनं दुःखनिरोधं ब्रह्मप्राप्तिं च इति अर्थत्रयम् आश्रित्य उपनिषद्शब्दं ब्रह्मविद्या-द्योतकत्वेन स्वीकरोति ।

**उपनिषद् सङ्ख्याः –**

यद्यपि उपनिषदां सङ्ख्याः शतद्वयपर्यन्तं मन्यते, तथापि तत्र एकादश उपनिषदा एव मुख्यत्वेन मन्यन्ते। तद्यथा ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीय-ऐतरेय-छान्दोग्य-बृहदारण्यक-श्वेताश्वेतराः।

श्रीशङ्कराचार्योऽपि एतासामेव भाष्यम् अकरोत्।

**उपनिषदां महत्त्वम् –**

उपनिषदां महत्त्वं न केवलं भारतीयैः, अपितु पाश्चात्यैरपि मनीषिभिः निर्विवादं स्वीक्रियते। उपनिषदो हि सुखशान्ति साधिकाः, भव सागर-संतारिकाः, माया मोह-निबद्ध-जीवाधि-विनाशन-हेतवः, अभ्युदय-निश्रेयसौ-आप्तिहेतवः च सन्ति। सर्वेषु अपि भारतीय दर्शनेषु आसां प्रभावः स्फुटम् अवलोक्यते। सर्वैः अपि मनीषिभिः, धर्मप्रवर्तकैः, तत्त्वज्ञैः, आचारशिक्षकैः, धर्मशास्त्रकारैश्च उपनिषदां महत्त्वं निजदृष्ट्या स्वीक्रियते। इमा उपनिषदो न केवलं स्वप्रभया भारतमेव विद्योतयन्ति, अपितु सकलमपि भुवनं भासयन्ति।

**उपासना शब्देनाभिप्रायः -**

उप+आस+युच्+टाप् स्त्रीलिङ्ग शब्दः। आराधनम् 'चित्तस्य समानप्रत्ययप्रवाहकरणमिति यावत्।' यथा- उपासनं नाम समानप्रत्ययप्रवाहकरणम् । अत्र एषः अद्वैतविद्याविषयकः प्रकरणः अभ्युदयस्य साधनभूत उपासनायाः वर्णितः, यस्य फलं कैवल्यमोक्षस्य समीपवर्ती। यश्च अद्वैतब्रह्मापेक्षया 'मनोमयः प्राणशरीरः' इत्यादि वाक्यस्यानुसारं किञ्चिद् विकारं आप्नुवन् ब्रह्मणा सम्बद्धः। एताः उपासनाः कर्माङ्गेन सम्बद्धाः कर्मफलस्य च समृद्धिः एव एतस्य फलम्। अर्थात् उपनिषद् शब्देन ज्ञातव्येन तथा मनोवृत्तेन च तस्मिन् आत्मज्ञानोपानासभिश्च समानताऽस्ति। एतेन कारणेन एताः उपासनाः आत्मविद्यायाः प्रकरणे आप्ताः। यथा अद्वैतज्ञानं मनोवृत्तिमात्रं तथैव अन्य उपासनाऽपि मनोवृत्तिरूपैव। अत्रैव उभयस्य समानता भवति। अद्वैतज्ञानोपासनासु भिन्नताऽपि एवमेव अद्वैतात्मज्ञानम् अक्रियात्मनि स्वभावेन आरोपितं कर्तृत्त्वादि कारकक्रियाफलस्य च भेदज्ञानं निवर्तयति। यथा प्रकाशस्य कारणेन रज्वादौ आरोपितसर्पादिः ज्ञानं निवृर्त्यते। उपासना तु कदापि शास्त्रोक्तालम्बनं गृहीत्वा तस्मिन् विजातीयप्रतीया अव्ययहितसदृशं चित्तवृत्त्या प्रवाह्यते। अत्रैव अद्वैतज्ञानोपासनानां च भिन्नताऽस्ति। एताः उपासनाः चित्तशुद्धिं कुर्वाणा वस्तुतत्त्वस्य प्रकाशिकाः अद्वैतज्ञाने उपकारिण्यः तथा आलम्बनयुक्तेन सुगमतया सम्पन्नः शक्नोति ।

**मोक्षविद्याः-**

तत्त्वहितमर्थपर्यालोचनपरायणाः पुरूषाः प्रतिपादयन्ति अखिल-जगद्धितानुशासन श्रुतिनिकटशिरसि समाधिगतोऽयमर्थो यज्जीव-परमात्मयाथात्म्यज्ञानपूर्वक वर्णाश्रमधर्मेतिकर्त्तव्यतापरम पुरुष-चरणयुगलध्यानार्चन प्रमाणादिरत्यर्थप्रियस्तत् प्राप्तिफलं इति।

शास्त्रणि हि परमात्मनः प्राप्यत्वेन जीवनस्य प्रापकत्वेन वर्णनं कुर्वन्ति। तस्य परमात्मनः प्राप्तिसाधनरूपेण उपनिषत्सु द्वात्रिंशत् सङ्ख्याका विद्याः उपदिष्टाः सन्ति। इमा विद्या एव औपनिषदोपासनाशब्देनाप्यभिधीयन्ते। तासां सर्वासामुपनिषद् विद्यानामात्मविद्याशब्दवाच्यानाम् विवरणम् मनाऽधस्तात् समुप-स्थाप्यते ।

**१. सद्विद्या –**

इयम् विद्या छान्दोग्योपनिषदः षष्ठाध्याये समुपवर्णिता अस्ति। अस्याः विद्या आरम्भ 'सदेवसोम्येदमग्रासीदेकमेवाद्वितयम्"[1] इति श्रुतेस्सम्भवति। अस्याम् विद्यायामिदं प्रतिपादितं वर्तते यदस्य जगतः अभिन्ननिमित्तोपादानकारणं ब्रह्मैव वर्तते। इयम् विद्या जगतः अभिन्ननिमित्तोपादानरूपेण ब्रह्मण उपासनाया उपदेशं करोति। महर्षिः बादरायणः शारीरकमीमांसायाः ईक्षत्येधिकरणे अस्याः विद्यायाः चर्चामकार्षीत्।

**२. आनन्दमयविद्या-**

इयम् विद्या तैत्तिरीयोपनिषदः ब्रह्मनन्दवल्लयां समुपवर्णितो वर्तते। अस्या विद्यायाः आरम्भः 'ब्रह्मविदाप्नोति परम [2]इति श्रुतेर्भवति। इयम् विद्या ईश्वरस्य कल्याणगुणाकरत्वेन आनन्दमयरूपेण चोपासना-मुपदर्शिता। अस्याः विद्यायाः चर्चाम् बादरायणः आनन्दमयाधि-करणेऽकार्षीत्।

**३. अन्तरादित्यविद्या-**

इयं विद्या छान्दोग्योपनिषदि वर्णिता वर्तते। 'य एषोऽन्तरादित्ये [3]श्रुर्तितः अस्यां विद्याया आरम्भो भवति। अस्यां विद्यायामुपदिष्टं वर्तते यदात्मकररूपाभिरीश्वरस्योपासना कर्त्तव्येति। अस्याः विद्यायाः व्याख्यां महर्षिः बादरायणः शारीरकमीमांसायाः 'अन्तराधिकरणे " [4]अकार्षीत्।

**४. उद्गीथाकाशविद्या-**

इयमपि विद्या छान्दोग्योपनिषदि समुपवर्णिता वर्तते। अस्या विद्याया आरम्भः 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते [5]इति श्रुतेर्भवति। महर्षिः बादरायणः ब्रह्मसूत्रस्य 'आकाशाधिकरणे [6]अस्या विद्यायाः वर्णितमकार्षीत्। अस्यां विद्यायाम् वर्णितमास्तेयदीश्वर एवास्य चराचरस्य प्रकाशको वर्तते इति।

**५. प्रस्तावप्राणविद्या-**

अस्याः विद्याया आरम्भः छान्दोग्योपनिषदः कतमा सा देवतेति प्राण इति होवाच, सर्वाणि हवा इमानि भूतानि प्राणमेवाभि संविशन्ति । प्राणामभ्युज्जिहते इति[7]" श्रुतेर्भवति। अस्याम् विद्यायाम् ईश्वरस्यैव चराचरस्य प्राणत्वम् प्रातिपादितमस्ति। ब्रह्मसूत्रस्या 'प्राणाधिकरणे[8] महर्षिः बादरायणः अस्याः विद्यायाः व्याख्यामकरोत् ।

**६. गयत्रीज्योतिविद्या –**

छान्दोग्योपनिषदः 'अथ यदतः परो दिवो ज्योतिर्दिव्य ते श्रुतेरस्याः [9]विद्याया आरम्भो भवति। अस्याम् विद्यायाम् ईश्वर एव सम्पूर्ण जगति प्रकाशते इति प्रतिपादितमस्तीतिः प्रतिपादितम्। महर्षिः बादरायणः ब्रह्मसूत्रस्य ज्योतिश्धिकरण[10] विद्यायाः विवे चनमकरोत्।

**७. प्रतर्दनविद्या –**

अस्याः विद्यायाः विवेचनम्म् महर्षिः बादरायणः 'ब्रह्मसूत्रस्येन्द्रप्राणाधिकरणे"[11]। कृतवान्। अस्याः विद्यायाः आरम्भः 'कौषीतकि ब्राह्मणस्य (प्रतर्दनो) हवै दैवोदासिरिन्द्रस्य धामोपजगाम

युद्धेन पौरुषेण च।' इति श्रुतेर्भवति। अस्यां विद्यायाम् प्रतिपादितमास्ते यत् परमात्मैव इन्द्रादिचेतनाणाम् ग्राणाद्य चेतनानाञ्च आत्मास्तीति।

**८. शाण्डिल्यविद्या –**

छान्दोग्योपनिषदः 'सर्वं खल्विदं ब्रह्म' तञ्ज लानीति शान्त उपासीत [12]इति श्रुतेरस्याः विद्याया आरम्भो भवति। अस्याः विद्यायाः व्याख्यामकरोत् महर्षिः बादरायणः शारीरक श्रीमांसायाः सर्वत्रप्रसिद्धयाधि करणे[13] ।अस्यां विद्यायामस्यार्थस्य प्रतिपादनम् कृतं वर्तते यत् ईश्वरस्योपासना सर्वपदार्थनाम् सत्तास्थितिलय-स्त्रीलत्वरूपेण कर्त्तव्येति।

**९. नचिकेतसविद्या –**

अस्या विद्याया आरम्भः कठोपनिषदः 'यस्य ब्रह्म च क्षत्त्रं चोभे भवत ओदनम्[14] श्रुतेर्भवति। अस्याः विद्यायाः व्याख्याम् महर्षिः बादरायणः ब्रह्मसूत्रणाम् अत्राधिकरणे[15] अकरोत्। ईश्वरे सम्पूर्णस्य जगतः स्वात्मनि लीनकरणस्य शक्ति वर्तते, इत्येवास्या विद्यायाः प्रतिपाद्यम् वर्तते।

**१०. उपकोसलविद्या –**

उपकोसलविद्या - अस्या विद्याया आरम्भः छान्दोग्योपनिषदः 'य एषोऽक्षिणि पुरुषो दृश्यते [16]श्रुतेर्भवति। अस्यां विद्यायां प्रतिपादितमस्ति यत् अक्षिणि ईश्वरस्य नित्यस्थिते ध्र्यानम् कर्त्तव्यमिति। अस्याः विद्यायाः व्याख्याः महर्षिः बादरायणः ब्रह्मसूत्रस्य अन्तराधिकरण' [17] अकरोत् ।

**११. अन्तर्यामिविद्या –**

इयं विद्या बृहदारण्यकोपनिषदि वर्णिता वर्तते। अस्यां विद्यायाम् जगच्छरीरकस्येश्वरस्योपासना समुपवर्णिता वर्तते। अस्याः विद्याया उपसंहारः बृहदारण्यकोपनिषदः 'नान्योऽतोऽस्तिद्रष्टा[18] श्रुत्या भवति। महर्षिः बादरायणः 'ब्रह्मसूत्रस्यान्तर्याम्यधिकरणे[19] अस्याः विद्याया विवेचनमकरोत्।

**१२. अक्षरविद्या –**

इयं विद्या मुण्डकोपनिषदि समुपवर्णिता वर्तते। अस्याः विद्यायाः आरम्भः 'यत्तदद्रेश्यमग्राह्यम्[20] इति श्रुत्या भवति। अस्याम् विद्यायाम् प्रतिपादितमस्ति यत् ईश्वरस्य विरारूपस्य कल्पनायाम् अग्नयादिका देवा ईश्वरस्याङ्गरूपेण तिष्ठन्ति। ब्रह्मसूत्रस्यादृश्य-त्वादिगुणका-धिकरणे इयम् विद्या महर्षिणा बादरायणेन समुपवर्णिता वर्तते ।

**१३. वैश्वानरविद्या –**

अस्या विद्याया आरम्भः छान्दोग्योपनिषदः पञ्चमाध्यायस्यैकादशात् खण्डात् भवति। अस्याम् विद्यायाम् प्रतिपादितमस्ति यत् ईश्वरोऽङ्गी वर्तते। स्वर्गलोकादित्यलोकप्रभृतयो लोकास्तस्याङ्गानि सन्तीति। अस्या विद्यायाः विस्तृतं विवेचनम् महर्षिः बादरायणः वैश्वानराधिकरणे[21] अकरोत्।

**१४. भूमविद्या** –

इयं विद्या छान्दोग्योपनिषदः सप्तमेऽध्याये समुपवर्णिता वर्तते। अस्यां विद्यायामीश्वर अनन्तैश्वरर्यसम्पन्नरूपेण वर्णितो वर्तते। अस्याः विद्यायाः प्रख्याताः श्रुतयः 'यत्र नान्यत् पश्यति नान्यच्छृणोति' इत्यादिका सन्ति। अस्याः विस्तृतं विवेचनम् ब्रह्मसूत्रस्य भूमाधिकरणे[22] कृतं वर्तते। अस्याः विद्यायाः भूमा शब्दो हि वैपुल्यस्य वाचकः।

**१५. गार्ग्यक्षरविद्या –**

इयं विद्या बृहदाण्यकोपनिषदि समुपवर्णिता वर्तते। अस्याः विद्यायाः प्रख्याता श्रुतिः 'सहोवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमत्वह्रस्वदीर्घमलोहितमस्नेहमच्छायम्' इति वर्तते। इयं विद्या ईश्वरस्यैवाखिलजगन्नियामकत्वमापादयति। महर्षिणा बादरायणे-नास्याः विद्यायाः चर्चा ब्रह्मसूत्रस्याक्षराधिकरणे कृता।

१६. **प्रणवोपास्यपरमपुरुषविद्या-**

इयं विद्या प्रश्नोपनिषदि वर्णिता वर्तते। प्रश्नोपनिषदः पञ्चमे प्रश्ने इयं विद्या उपक्रान्ता वर्तते। 'य पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत इति श्रुतिरस्याः विद्यायाः प्रख्याता[23]श्रुतिर्विद्यते। अस्यां विद्यायामीश्वरो मुक्तजीवोपभोग्यवर्णितो वर्तते। ब्रह्मसूत्रस्य ईशतिकर्माधिकरणे इयं विद्या चर्चिता वर्तते।

**१७. दहरविद्या –**

इयं विद्या छान्दोग्योपनिषदि वर्णिता वर्तते। 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डिरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः तस्मिन् यदस्त दन्वेष्टव्यं तद्वावविजिज्ञासितव्यम्[24]। इति श्रुत्या अस्या विद्याया प्रारम्भो भवन्ति। अस्यां विद्यायाम् ईश्वरः आधाररूपेण जगच्चाध्येयरूपेण समुपवर्णितः। इत्थं जगदीश्वरयोः आधाराधेय भावरूपं सम्बन्धं प्रतिपादयतीयं विद्या। ब्रह्मसूत्रस्य अधिकरणे इयं विद्या [25]चर्चिता वर्तते महर्षिणा बादरायणेन ।

**१८. अंगुष्ठप्रमितविद्या –**

इत्थं विद्या कठोपनिषद: [26] इति तिसृषु श्रुतिषु समुपवर्णिता विद्यते। अस्या विद्याया अभिप्रायो वर्तते यत् ईश्वरः सर्वभूतानाम् हृद्देशेऽस्त्यन्तर्यामीरूपेणावस्थितो वर्तते इति रूपेणोपासना मुमुक्षुणा पुरुषेण कर्त्तव्या। महर्षिः बादरायणः प्रत्यपादनम् प्रमिताधिकरणे यत् सर्वेषां भूतानाम् हृदये सर्वदा विद्यमानः अंगुष्ठपरिमाणकः ईश्वरोऽस्याखिलस्य जगतो नियामको वर्तते।

१९. **देवोपास्यज्योर्तिविद्या-**

इयं विद्या बृहदारण्यकोपनिषदित्यादिषु अनेकेषु ग्रन्थेषु वर्णिता विद्यते। 'तं देवा ज्योतिषां ज्योतिरायुर्होपासते परम् इत्यादिका अस्याः विद्यायाः प्रख्याताः श्रुतयः[27] सन्ति। अस्याः विद्यायाः विवेचनम् शारीरकमीमांसायाः देवताधिकरणस्य माध्यमेन कुर्वन् महर्षिः

बादरायणः प्राह यत् येन प्रकारेण मानवानामीश्व-रोपासनायामधिकारो वर्तते तेनैव प्रकारेण देवानामपि।' इति।

**२०. मधुविद्या –**

इयं छान्दोग्योपनिषद् 'असौवाव आदित्योदेवमधु[28] इति श्रुतौ समुपवर्णिता वर्तते। शारीरकमीमांसायाः मध्वधिकरणे अस्याः विद्यायाः विवेचनं कुर्वन् महर्षिः बादरायणः प्राह यत् वस्वादित्यादिकानाम् देवानाप्यात्मा ईश्वर एव वर्तते ।

**२१. संवर्गविद्या –**

इयं छान्दोग्योपनिषदो विद्या वर्तते। अस्याः विद्यायाः प्रारम्भः ज्ञानश्रुतिः किल पौत्रायण:[29] श्रुतेः भवति। अस्यां विद्यायामयमर्थोऽस्ति प्रतिपादितो यत् सर्वे जीवः ईश्वरस्योपासनां स्वस्वाधिकारानुसारेण कत्त्त क्षमाः सन्ति। अस्याः विद्यायाः व्याख्यां महर्षिः बादरायणः शारीरकमीमांसायाः अपशूद्राधिकरणेऽकरोत्।

**२२. अजाशरीरक विद्या-**

इयं विद्या बृहदारण्यकोपनिषदि वर्णिता वर्तते। अस्याः विद्यायाः प्रारम्भः बृहदारण्यकोपनिषदः 'यस्मिन् पञ्च पञ्चजनाः आकाशश्च प्रतिष्ठितः ।[31] इति श्रुत्या भवति। अस्याः विद्यायाः प्रतिपाद्यो विषयो वर्तते यत् 'परमात्मैव प्रकृतिशरीरको वर्तते' इति। अत्राजाशब्देन प्रकृतिरभिहिता वर्तते। इयं विद्या शारीरकमीमांसायाः व्याख्या संख्योपसंग्रहाधिकरणे कृता वर्तते।

**२३. वाल्मीकि विद्या –**

इयं कौषीतकिब्राह्मणोपनिषदो विद्या वर्तते। 'अखिलमिदं जगत् ईश्वरस्य कार्यं वतर्ते' इत्येवमास्ते अस्याः विद्यायाः प्रतिपाद्यम्। अस्याः विद्यायाः उपसंहार' यस्य वै तत् कर्म''[32] इत्यादिकया श्रुत्या भवति। अस्याः विद्यायाः विवेचनं महर्षिः बादरायणः अकार्षीत्।

**२४. मैत्रेयी विद्या-**

बृहदारण्यकोपनिषदः अस्याः विद्यायाः प्रतिपाद्यम् वर्तते यत् ईश्वरस्या साक्षात्कार एव मोक्षस्य साधनम् वर्तते। अस्याः विद्यायाः प्रारम्भः न वा अरे! पत्युः कामाय पतिः प्रियो भवति श्रुत्या भवति। अस्याः विद्यायाः व्याख्यामकार्षीन्महर्षि बादरायणः शारीरकमीमांसाया वाक्यान्वयाधिकरणे।

**२५. द्रुहिण रुद्रादिशरीरकविद्या-**

विद्यायाम् प्रतिपादितमस्ति यद् द्रुहिण रुद्रादिका अपि उपासनाया परमात्मानमेव प्रसादयन्ति। इयं विद्य तैत्तिरीयनारायणोपनिषदिः तैत्तिरीयारण्यकस्य षष्ठे प्रश्ने च समुपश्लोकिता वर्तते। अस्याः विद्यायाः प्रारम्भहिरण्यगर्भसूक्तस्य 'हिरण्यगर्भः समवर्तताधि' इति मन्त्राद्भवति। अस्याः विद्यायाः व्याख्यानम् महर्षि तैत्तिरीयसंहिताया हिरण्यगर्भसूक्ते समुपवर्णितायामस्या बादरायणः सर्वव्याख्याना-धिकरणे कार्षीत्।

**२६. पञ्चाग्निविद्या-**

इयं छान्दोग्योपनिषद् अत्यन्तप्रख्याताविद्या वर्तते। अस्याः विद्यायाः प्रारम्भः 'वेत्थ सोम्य! यथा पञ्चम्यामाहतौ आपः पुरुषवचसाभि लभयो भवन्ति' इति श्रुत्या भवति। अस्याः विद्यायाः प्रतिपाद्यमस्ति यत् 'जीवानाम् मुक्तिः ईश्वरेच्छाधीना भवति। अस्याः विद्यायाः विवेचनं महर्षिः बादरायणः तदन्तरप्रतिपत्त्यधिकरणेऽकार्षीत्।

**२७. आदित्यस्थाहर्नामकविद्या-**

अस्याः विद्यायाः प्रारम्भः बृहदारण्यकोपनिषदः 'सत्यं ब्रह्म' इति श्रुत्या भवति। अस्याः विद्यायाः व्याख्यामकार्षीयत् आदित्यमण्डल-मध्यवर्तीति पुरुषरूपेण परमात्मन उपासना करणीया वर्तते। परमात्मनः उपासना अहर् नाम्ना करणीया वर्तते।

**२८. अक्षिस्थाहन्नामकविद्या-**

इयमपि बृहदारण्यकोपनिषदो विद्या वर्तते। अस्याः विद्यायाः चर्चाम् बादरायणः ब्रह्मसूत्रस्य संबन्धाधिकरणऽकरोत्। अस्याः विद्यायाः प्रतिपाद्यं वर्तते यत् आत्मकल्याणकामिना पुरुषेण अक्षिस्थ पुत्तलिकायाम् दृश्यमानस्य पुरुषस्योपासना अहन्नाम्ना कर्त्तव्या। उपासकस्य दक्षिणाक्षिणि दृश्यमानः पुरुषः पुण्डरीकाक्षस्य परमात्मनः स्वरूपं वर्तते।

**२९. पुरुषविद्या –**

इयं तैत्तिरीयनारायणोपनिषदो विद्या वर्तते। अस्याः विद्यायाः प्रारम्भः 'तस्यैव विदुषो यज्ञस्यात्मना यजमानः इति श्रुत्या भवति।' इयं विद्याया परमात्मनः पुरुषोत्तमरूपेण प्रतिपादनं करोति। अस्याः विद्यायाः विस्तृतं विवेचनं महर्षिः बादरायणः ब्रह्मसूत्रस्य पुरुषविद्ययाधिकरणे अकार्षीत्।

**३०. ईशावास्यविद्या –**

ईशावास्योपनिषदि वर्णितायाः अस्याः विद्यायाः प्रारम्भः ईशावास्योपनिषदः 'कुर्वन्नेवेहकर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽक्तिनकर्म लिप्यते नरे। इति श्रुत्या भवति। अस्याः विद्यायाः विवेचनं कुर्वन् महर्षिः बादरायणः शारीरकमीमांसायाः पुरुषार्थाधिकरणे प्रत्यपीपदत् यत् 'कर्मसहकृतेन ज्ञानेन द्वारैव ईश्वरः' प्राप्यो वर्तते।

**३१. उपस्थिकरोलविद्या –**

षष्ठाध्यायस्य प्रथमे ब्राह्मणे इयं विद्याया वर्णिता वर्तते। अस्याः विद्याया उपसंहारः 'नध्वा अस्यानन्नं जग्धं भवति इति श्रुत्या भवति। अस्यां विद्यायां प्रतिपादितमस्तिा यत् परमात्मोपासनायै साधन प्रकानुगृहीतेन मनसा भाव्यम्। अस्याः विद्यायाः व्याख्यां महर्षिः बादरायणः सर्वान्नानुमत्थधिकरणे करोत् ।

**३२. व्याहृतिशारीरकविद्या –**

बृहदारण्यकोपनिषदः विद्यायाः प्रारम्भः 'य एतस्मिन्मण्डले पुरुषः तस्य भूरिति शिरः श्रुतेर्भवति। अस्याम् विद्यायाम् ईश्वरो मन्त्रमयः व्याहृतिशरीरकश्चोक्तो वर्तते। इयं विद्याया सम्बन्धाधिकरणे व्या वहृता वर्तते।

आसु विद्यासु परमात्मनः द्वात्रिंशद्विधाः उपासनाः वर्णितास्सन्ति। आन्पु विद्यासु कामाप्ये कामप्येका मपि विद्यायामश्रित्य मुमुक्षुपुरुषः परं निःश्रेयस् अपि प्राप्तिं कर्तुं शक्यते। इमाः सर्वाः विद्याः ब्रह्मविद्यानाम्नाभिहिता भवन्तिः। एताभ्यो विद्याभ्यो व्यतिरिक्ति-न्यान्यासाख्या विद्या तैत्तिरी यनारायणोपनिषदि वर्णिता वर्तते। इयमेव विद्या मोक्षावाप्तेः रू.पेण वर्णिता वार्तते। तैत्तिरीय-नारायणोपनिषदेवास्याः विद्यायाः उपजीव्यं वर्तते। 'सत्यं परः परः सत्यम्' श्रुत्या भवति अस्याः विद्यायाः प्रारम्भः। अस्य मन्त्रस्यान्ते स्पष्टरूपेणाभिहितमऽस्ति यन्न यासः सर्वोत्कृ ष्टा विद्या वर्तते। तथाहि 'न्यास इति ब्रह्मा, ब्रह्मा हि परः परो हि ब्रह्मा, तानि वा एतान्य वराणि तपांसि न्यास एवात्वरेचयत्।

**ग्रन्थसूची-**


1.Easwaran,E. (2007). The Upanishads (E. Easwaran, Trans.). Nilgiri Press.

2.Radhakrishnan, S. (Ed.). (1994). The principal Upanishads. HarperCollins.

3.Gambhirananda, S. (1957). Eight Upanishads. Advaita Ashrama.

4.Katz, V., & Egenes, T. (2015). The Upanishads: A new translation. Tarcher/Penguin.

5.Dasgupta, S. (1991). Indian philosophy (Vol. 1). Motilal Banarsidas


**सन्दर्भ-सूची -**

[1] छान्दोग्यो पनिषद् ६.२.१

[2] तैत्तिरीयोपनिषत्-ब्रह्मवल्ली १.१

[3] छन्दीग्योपनिषद् ६.१.७

[4] ब्रहासूत्र १.१.७

[5] खान्दोग्योपनिषद् १.१.१

[6] बदासूत्र १.१.८

[7] छान्दोग्योपनिषद् १.११.४

[8] ब्रह्मसूत्र १.१.९

[9] छान्दोग्योपनिषद् ३.१३.७

[10] व्रह्मसूत्रम्१.१.१०

[11] व्रह्मसूत्रम्१.१.१०

[12] छान्दोग्योपनिषद् ३.१४.१

[13] व्रह्मसूत्रम्१.१.१०

[14] कठोपनिषद् १.२.२५

[15] व्रह्मसूत्रम् १.२.३

[16] छान्दोग्योपनिषद् ४.१५.१

[17] व्रह्मसूत्रम् १.२.३

[18] बृहदारण्यकोपनिषद् ३.७.२३

[19] व्रह्मसूत्रम् १.२.4

[20] मुण्डकोपनिषद् १.१.६

[21] ब्रह्मसूत्र १.२.६

[22] ब्रह्मसूत्र १.३.२

[23] प्रश्नोपनिषद् ५.५

[24] छान्दोग्योपनिषद् ८.१.१

[25] व्रह्मसूत्र १.३.५

[26] कठोपनिषद् २.१.१.१२-१७

[27] बृहदारण्यकोपनिषद् ६.४.१६

[28] छान्दोग्योपनिषद् ३.१.१

[29] छान्दोग्योपनिषद् ४.१.१

[30] बृहदारण्यकोपनिषद् ३.७.२३

[31] कौषीतकिब्राह्मणोपनिषद् ४.१९